यथा,—
"अप्सु तस्मिन्नहोरात्रे पूर्व्वं विशति चन्द्रमाः
ततो वीरुत्सु वसति प्रयात्यर्कं ततः क्रमात् ॥
छिनत्ति वीरुधो यस्तु वीरुत्संस्थे निशाकरे।
पत्रं वा पातयत्येकं ब्रह्महत्यां स विन्दति ॥"
इति श्रीविष्णुपुराणे २ अंशे १२ अध्यायः ॥*॥
आश्रमे रोपणीया शुभदा लतादिर्यथा,—
"अलावुश्चापि कुष्माण्डं मायाम्बुश्च सुकासुकः।
खर्ज्जुरी कर्कटी चापि शिविरे मङ्गलप्रदा ॥
वास्तूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदा।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥
शाखा। प्रियङ्गुः। (अस्याः पर्य्यायो यथा,—
"प्रियङ्गुः फलिनी कान्ता लता च महिलाह्वया।
गुन्द्रा गुन्द्रफला श्यामा विष्वक् सेनाङ्गना-
प्रिया ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
स्पृक्का। (यथास्याः पर्य्यायः।
"तस्करोचारकश्चण्डो देवी स्पृक्का लता लघुः ॥"
इति वैद्यकरत्नमालायाम् ॥)
अशनपर्णी। इत्यमरः ॥ ज्योतिष्मती। (अस्याः पर्य्यायो यथा,—
"ज्योतिष्मती स्यात् कटभी ज्योतिष्का कङ्गनीति च।
पारावतपदी पण्या लता प्रोक्ता ककुन्दनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
लताकस्तूरिका। माधवी। दूर्व्वा। इति मेदिनी। ते, ५१-५२ ॥ कैवर्त्तिका। सारिवा। इति राजनिर्घण्टः ॥ (वृहती। तत्पर्य्यायो यथा,—
"भण्टाकी वृहती सिंही वार्त्ताकी राष्ट्रिका-
कुली।
प्रसहा रक्तपाका च लता वृहतिका परा ॥")
नारी। यथा,—
"नग्नां परलतां पश्यन् अयुतं यस्तु साधकः।
प्रजपेत् स भवेत् शीघ्रं विद्याया वल्लभः स्वयम् ॥"
इति तन्त्रसारे श्यामासाधनम् ॥
(तथा च नैषधे। १। ८५।
"नवा लता गन्धवहेन चुम्बिता
करम्बिताङ्गी मकरन्दशीकरैः।
दृशा नृपेण स्मितशोभिकुड्मला
दरादराभ्यां दरकम्पिनी पपे ॥"
"नवा नवीना लता माधवीलता पक्षे नवा रम्या लता स्त्री।" इति तट्टीका ॥*॥ अप्सरोविशेषः। यथा, महाभारते। १। २१७। २०।
"अहञ्च सौरभेयी च समीची वुद्बुदा लता।
यौगपद्येन तं विप्रमभ्यगच्छाम भारत ! ॥")
लताकरञ्जः, पुं, (लतारूपः करञ्जः।) करञ्जविशेषः। कण्टकरेज इति हिन्दी भाषा। तत्पर्य्यायः। दुःस्पर्शः २ वीराख्यः ३ वज्रबीजकः ४ धनदाक्षी ५ कण्टफलः ६ कुवेराक्षी ७। अस्य पत्रगुणाः। कटुत्वम्। उष्णत्वम्। कफवातनाशित्वञ्च। तद्बीजगुणाः। दीपनत्वम्। पथ्यत्वम्। शूलगुल्मविषापहत्वञ्च। इति राजनिर्घण्टः ॥
लताकस्तूरिका, स्त्री, (लतारूपा कस्तूरी तद्वद्गन्धत्वात्। ततः स्वार्थे कन्।) लताकस्तूरी। तत्पर्य्यायः। कटुः २ दक्षिणदेशजा ३। अस्या गुणाः। तिक्तत्वम्। स्वादुत्वम्। वृष्यत्वम्। हिमत्वम्। लघुत्वम्। चक्षुष्यत्वम्। छेदनीत्वम्। श्लेष्मतृष्णावस्त्यास्यरोगनाशित्वञ्च। इति पथ्यापथ्यविवेकः ॥ अपि च।
"लताकस्तूरिका तिक्ता हृद्या शीतास्य-
रोगनुत् ॥"
इति राजवल्लभः ॥
लताजिह्वः, पुं, (लतेव जिह्वा यस्य।) सर्पः। इति शब्दमाला ॥
लतातरुः, पुं, (लतेव दीर्घस्तरुः।) नारङ्गवृक्षः। तालवृक्षः। इति शब्दमाला ॥ शालवृक्षः। इति त्रिकाण्डशेषः ॥
लताद्रुमः, (लतेव द्रुमः दीर्घत्वात्।) लताशालः। तत्पर्य्यायः। तार्क्ष्यः २ अश्वकर्णः ३ कुशिकः ४ वन्यः ५ दीर्घः ६। इति रत्नमाला ॥
लतापनसः, पुं, (लतायां पनसमिव फलमस्य।) फललताविशेषः। तरमुज् इति ख्यातः। तत्पर्य्यायः। चेलालः २ चित्रफलः ३ सुखाशः ४ राजतेमिषः ५ नाटाम्रः ६ सेटुः ७। इति त्रिकाण्डशेषः ॥
लतास्पृक्का, स्त्री, (लताप्रधाना स्पृक्का।) समुद्रान्ता। इति शब्दरत्नावली ॥ पिड़िंशाक इति भाषा ॥
लताप्रतानिनी, स्त्री, (लताप्रतानोऽस्त्यस्येति। इनिः।) शाखाप्रचयवती लता। तत्पर्य्यायः। वीरुत् २ गुल्मिनी ३ उलपः ४। इत्यमरभरतौ ॥ वीरुधा ५ वरुत् ६। इति शब्दरत्नावली ॥ प्रतानी ७ कक्षः ८। इति जटाधरः ॥
लताफलं, स्त्री, (लतायां फलमस्य।) पटोलः। यथा,—
"वास्तूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदा।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥
लताभद्रा, स्त्री, (लतया भद्रा यस्याः।) भद्रालीवृक्षः। इति शब्दमाला ॥
लतामणिः, पुं, (लतासदृशो मणिः।) प्रवालः। इति त्रिकाण्डशेषः राजनिर्घण्टश्च ॥ (प्रवालशब्देऽस्य विवरणं ज्ञातव्यम् ॥)
लतामरुत्, स्त्री, (लतायां मरुत् यस्याः।) स्पृक्का। इति शब्दरत्नावली ॥
लतामाधवी, स्त्री, (लताप्रधाना माधवी।) माधवीलता। इति शब्दरत्नावली ॥
लतायष्टिः, स्त्री, (लता यष्टिरिव।) मञ्जिष्ठा। इति शब्दमाला ॥
लतायावकं, स्त्री, (लतायां याव इव यस्य। कन्।) प्रवालम्। इति हारावली। ६१ ॥ (गुणादयोऽस्य प्रवालशब्दे ज्ञेयाः ॥)
लतारसनः, पुं, (लतेव रसना यस्य।) सर्पः। इति हारावली। १५ ॥
लतार्कः, पुं, (लता अर्क इव तीव्रा यस्य।) हरित्पलाण्डुः। तत्पर्य्यायः। द्रुद्रुमः २। इत्यमरः ॥
लतालकः, पुं, हस्ती। इति त्रिकाण्डशेषः ॥
लतावेष्टः, पुं, (लतयेव आवेष्टो वेष्टनं यत्र।) षोड़शरतिबन्धान्तर्गततृतीयबन्धः। यथा,—
"बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा स्त्रियं रमेत्।
लघुलिङ्गताड़नं योनौ लतावेष्टोऽयमुच्यते ॥"
इति रतिमञ्जरी ॥ * ॥
पर्व्वतविशेषः। यथा,—
"अन्वेषणे निरुद्धस्य चरान् यादिष्टवान् तदा।
अभ्यन्तरञ्च मार्गध्वं वाह्यतश्च समन्ततः ॥
वेणुमन्तं लतावेष्टं तथा रैवतकं गिरिम्।
ऋक्षवन्तं गिरिञ्चैव मार्गध्वं त्वरिता हयैः ॥"
इति हरिवंशे वाणयुद्धम् ॥
(पर्व्वतोऽयं द्वारकायाः दक्षिणस्यां दिशि स्थितः। यथा, तत्रैव। १५५। १६।
"दक्षिणस्यां लतावेष्टः पञ्चवर्णो विराजते।
इन्द्रकेतुप्रतीकाशः पश्चिमस्यां तथा क्षुपः ॥")
लतावेष्टितकं, स्त्री, (लतयेव वेष्टितं वेष्टनं यत्र। कन्।) आलिङ्गनभेदः। यथा, शब्दमालायाम्।
"उद्घृष्टकं पीड़ितकं लतावेष्टितकं तथा ॥"
लताशङ्खः, पुं, शालवृक्षः। इति शब्दरत्नावली ॥
लतासाधनं, स्त्री, (लतया स्त्रिया साधनम्।) योषिदधिकरणकेष्टदेवताराधनम्। तद्यथा,—
"लतायाः साधनं वक्ष्ये शृणुष्व हरवल्लभे।
शतं केशे शतं भाले शतं सिन्दूरमण्डले ॥
स्तनद्वन्द्वे शतद्वन्द्वं शतं नाभौ महेश्वरि।
शतं योनौ महेशानि उत्थाय च शतत्रयम् ॥
एवं दशशतं जप्त्वा सर्व्वसिद्धीश्वरो भवेत्।
अथान्यत् संप्रवक्ष्यामि साधनं भुवि दुर्लभम् ॥
रजोऽवस्थां समानीय तद्योनौ स्वेष्टदेवताम्।
पूजयित्वा महाराज्ञौ त्रिदिनं पूजयेत्सुमम् ॥
शतत्रयञ्च षट्त्रिंशदधिकं प्रत्यहं जपन्।
अष्टोत्तरशतं पूर्व्वं चक्रवक्त्रे जपेद्बुधः ॥
ततस्तां नवभिः पुष्पैर्यजेदष्टोत्तरं शतम्।
ततः पूर्णाहुतिं दत्त्वा जपेदष्टोत्तरं शतम् ॥
धनवान् बलवान् वाग्मी सर्व्वयोषित्प्रियङ्करः।
षोड़शाहेन च भवेत् सत्यं सत्यं न संशयः ॥"
इति मायातन्त्रे १२ पटलः ॥
अन्यत् अन्नदाकल्पे १६ पटले गुप्तसाधनतन्त्रे ४ पटले च द्रष्टव्यम् ॥
लतिका, स्त्री, लता। इति लताशब्दात् स्वार्थे कन्प्रत्ययेन ष्णिकप्रत्ययेन वा निष्पन्नम् ॥ (यथा,—
"इयं सन्ध्या दूरादहमुपगतो हन्त मलयात्
तदेकां तद्गेहे विनयवति ! नेष्यामि रजनीम्।
समीरेणोक्तैवं नवकुसुमिता चूतलतिका
धुनाना मूर्द्धानं नहि नहि नहीत्येव कुरुते ॥"
इत्युद्भटः ॥)